# Shri Bala Sahasranamastotram 2

# શ્રીબાલાસહસ્રનામસ્તોત્રમ્ ૨

## Document Information

Text title : Bala Sahasranama Stotram 2

File name : bAlAsahasranAmastotram2.itx

Category : sahasranAmAvalI, devii, devI, dashamahAvidyA

Location : doc_devii

Proofread by : PSA Easwaran

Description/comments : from Balasaparya, vAmakeshvaratantra

Acknowledge-Permission: Mahaperiaval Trust

Latest update : August 19, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 13, 2024

*sanskritdocuments.org*

Shri Bala Sahasranamastotram 2

# શ્રીબાલાસહસ્રનામસ્તોત્રમ્ ૨

શૌનક ઉવાચ -
કૈલાસશિખરે રમ્યે નાનાપુષ્પોપશોભિતે ।
કલ્પપાદપમધ્યસ્થે ગન્ધર્વગણસેવિતે ॥ ૧॥

મણિમણ્ડપમધ્યસ્થે નાનારત્નોપશોભિતે ।
તં કદાચિત્ સુખાસીનં ભગવન્તં જગદ્ગુરુમ્ ॥ ૨॥

કપાલખટ્વાઙ્ગધરં ચન્દ્રાર્ધકૃતશેખરમ્ ।
ત્રિશૂલડમરુધરં મહાવૃષભવાહનમ્ ॥ ૩॥

જટાજૂટધરં દેવં વાસુકિકણ્ઠભૂષણમ્ ।
વિભૂતિભૂષણં દેવં નીલકણ્ઠં ત્રિલોચનમ્ ॥ ૪॥

દ્વીપિચર્મપરીધાનં શુદ્ધસ્ફટિકસન્નિભમ્ ।
સહસ્રાદિત્યસઙ્કાશં ગિરિજાર્ધાઙ્ગભૂષણમ્ ॥ ૫॥

પ્રણમ્ય શિરસા નાથં કારણં વિશ્વરૂપિણમ્ ।
કૃતાઞ્જલિપુટો ભૂત્વા પ્રાહ તં શિખિવાહનઃ ॥ ૬॥

કાર્તિકેય ઉવાચ -
દેવદેવ મહાદેવ ! સૃષ્ટિસ્થિત્યન્તકારક ! ।
ત્વં ગતિઃ સર્વદેવાનાં ત્વં ગતિઃ સર્વદેહિનામ્ ॥ ૭॥

ત્વં ગતિઃ સર્વદેવાનાં સર્વેષાં ત્વં ગતિર્વિભો ! ।
ત્વમેવ જગદાધારસ્ત્વમેવ વિશ્વકારણમ્ ॥ ૮॥

ત્વમેવ પૂજ્યઃ સર્વેષાં ત્વદન્યો નાસ્તિ મે ગતિઃ ।
કિં ગુહ્યં પરમં લોકે કિમેકં સર્વસિદ્ધિદમ્ ॥ ૯॥

કિમેકં પરમં સૃષ્ટિઃ કિં ભૌમૈશ્વર્યમોક્ષદમ્ ।
વિના તીર્થેન તપસા વિના વેદૈર્વિના મખૈઃ ॥ ૧૦॥

વિના જાપ્યેન ધ્યાનેન કથં સિદ્ધિમવાપ્નુયાત્ ।
કસ્માદુત્પદ્યતે સૃષ્ટિઃ કસ્મિંશ્ચ વિલયો ભવેત્ ॥ ૧૧॥

કસ્માદુત્તીર્યતે દેવ ! સંસારાર્ણવસઙ્કટાત્ ।
તદહં શ્રોતુમિચ્છામિ કથયસ્વ મહેશ્વર ! ॥ ૧૨॥

શ્રીમહાદેવ ઉવાચ -
સાધુ સાધુ ત્વયા પૃષ્ટોઽસ્મ્યહં પાર્વતીનન્દન ! ।
અસ્તિ ગુહ્યતમં પુત્ર ! કથયિષ્યામ્યસંશયમ્ ॥ ૧૩॥

સત્ત્વં રજસ્તમશ્ચૈવ બ્રહ્મવિષ્ણુશિવાદયઃ ।
યે ચાન્યે બહવો ભૂતાઃ સર્વે પ્રકૃતિસમ્ભવાઃ ॥ ૧૪॥

સૈવ દેવી પરાશક્તિર્મહાત્રિપુરસુન્દરી ।
સૈવ સંહરતે વિશ્વં જગદેતચ્ચરાચરમ્ ॥ ૧૫॥

આધારં સર્વભૂતાનાં સૈવ રોગાર્તિહારિણી ।
ઇચ્છાશક્તિઃ ક્રિયારૂપા બ્રહ્મવિષ્ણુશિવાત્મિકા ॥ ૧૬॥

ત્રિધા શક્તિસ્વરૂપેણ સૃષ્ટિસ્થિતિવિનાશિની ।
સૃજતિ બ્રહ્મરૂપેણ વિષ્ણુરૂપેણ રક્ષતિ ॥ ૧૭॥

હરતે રુદ્રરૂપેણ જગદેતચ્ચરાચરમ્ ।
યસ્ય યોનૌ જગત્સર્વમદ્યાપિ વર્તતેઽખિલમ્ ॥ ૧૮॥

યસ્યાં પ્રલીયતે ચાન્તે યસ્યાં ચ જાયતે પુનઃ ।
યાં સમારાધ્ય ત્રૈલોક્યે સમ્પ્રાપ્તં પદમુત્તમમ્ ।
તસ્યા નામસહસ્રં તે કથયામિ શ્ૃણુષ્વ તત્ ॥ ૧૯॥

ૐ અસ્ય શ્રીબાલાસહસ્રનામસ્તોત્રમન્ત્રસ્ય, ભગવાન્
દક્ષિણામુર્તિર્વામદેવઃ ઋષિઃ, ગાયત્રી છન્દઃ,
પ્રકટગુપ્તગુપ્તતરસમ્પ્રદાય કુલકૌલોત્તીર્ણાનિગર્ભરહસ્યાતિરહસ્ય
પરાપરરહસ્યા ચિન્ત્યા વર્તિની બાલા દેવતા ।
આં બીજં, હ્રીં શક્તિઃ, ક્લીં કીલકમ્, શ્રી બાલાપ્રીત્યર્થે પારાયણે વિનિયોગઃ ।

ધ્યાનં
આધારે તરુણાર્કબિમ્બસદૃશં હેમપ્રભં વાગ્ભવં
બીજં માન્મથમિન્દ્રગોપસદૃશં હૃત્પઙ્કજે સંસ્થિતમ્ ।
ચક્રં ભાલમયં શશાઙ્કરુચિરં બીજં તુ તાર્તીયકં

યે ધ્યાયન્તિ પદત્રયં તવ શિવે તે યાન્તિ સૂક્ષ્માં ગતિમ્ ॥

કલ્યાણી કમલા કાલી કરાલી કામરૂપિણી ।
કામાક્ષા કામદા કામ્યા કામના કામચારિણી ॥ ૨૨॥

કૌમારી કરુણામૂર્તિઃ કલિકલ્મષનાશિની ।
કાત્યાયની કલાધારા કૌમુદી કમલપ્રિયા ॥ ૨૩॥

કીર્તિદા બુદ્ધિદા મેધા નીતિજ્ઞા નીતિવત્સલા ।
માહેશ્વરી મહામાયા મહાતેજા મહેશ્વરી ॥ ૨૪॥

મહામોહાન્ધકારઘ્ની મહામોક્ષપ્રદયિની ।
મહાદારિદ્ર્યરાશિઘ્ની મહાશત્રુવિમર્દિની ॥ ૨૬॥

મહાશક્તિર્મહાજ્યોતિર્મહાસુરવિમર્દિની ।
મહાકાયા મહાબીજા મહાપાતકનાશિની ॥ ૨૭॥

મહામખા મન્ત્રમયી મણિપુરનિવાસિની ।
માનસી માનદા માન્યા મનશ્ચક્ષુરગોચરા ॥ ૨૮॥

ગણમાતા ચ ગાયત્રી ગણગન્ધર્વસેવિતા ।
ગિરિજા ગિરિશા સાધ્વી ગિરિસૂર્ગિરિસમ્ભવા ॥ ૨૯॥

ચણ્ડેશ્વરી ચન્દ્રરૂપા પ્રચણ્ડા ચણ્ડમાલિની ।
ચર્ચિકા ચર્ચિતાકારા ચણ્ડિકા ચારુરૂપિણી ॥ ૩૦॥

યજ્ઞેશ્વરી યજ્ઞરૂપા જપયજ્ઞપરાયણા ।
યજ્ઞમાતા યજ્ઞગોપ્ત્રી યજ્ઞેશી યજ્ઞસમ્ભવા ॥ ૩૧॥

યજ્ઞસિદ્ધિઃ ક્રિયાસિદ્ધિર્યજ્ઞાઙ્ગી યજ્ઞરક્ષકા ।
યજ્ઞપ્રિયા યજ્ઞરૂપા યાજ્ઞી યજ્ઞકૃપાલયા ॥ ૩૨॥

જાલન્ધરી જગન્માતા જાતવેદા જગત્પ્રિયા ।
જિતેન્દ્રિયા જિતક્રોધા જનની જન્મદાયિની ॥ ૩૩॥

ગઙ્ગા ગોદાવરી ગૌરી ગૌતમી ચ શતહ્રદા ।
ઘુર્ઘુરા વેદગર્ભા ચ રેવિકા કરસમ્ભવા ॥ ૩૪॥

સિન્ધુર્મન્દાકિની ક્ષિપ્રા યમુના ચ સરસ્વતી ।
ચન્દ્રભાગા વિપાશા ચ ગણ્ડકી વિન્ધ્યવાસિની ॥ ૩૫॥

નર્મદા કહ્લકાવેરી વેત્રવત્યા ચ કૌશિકી ।
મહોનતનયા ચૈવ અહલ્યા ચમ્પકાવતી ॥ ૩૬॥

અયોધ્યા મથુરા માયા કાશી કાઞ્ચી અવન્તિકા ।
દ્વારાવતી ચ તીર્થેશી મહાકિલ્વિષનાશિની ॥ ૩૭॥

પદ્મિની પદ્મમધ્યસ્થા પદ્મકિઞ્જલ્કવાસિની ।
પદ્મવક્ત્રા ચ પદ્માક્ષી પદ્મસ્થા પદ્મસમ્ભવા ॥ ૩૮॥

હ્રીઙ્કારી કુણ્ડલી ધાત્રી હૃત્પદ્મથા સુલોચના ।
શ્રીઙ્કારી ભૂષણા લક્ષ્મીઃ ક્લીઙ્કારી ક્લેશનાશિની ॥ ૩૯॥

હરિપ્રિયા હરેર્મૂર્તિર્હરિનેત્રકૃતાલયા ।
હરિવક્ત્રોદ્ભવા શાન્તા હરિવક્ષઃસ્થિતાલયા ॥ ૪૦॥

વૈષ્ણવી વિષ્ણુરૂપા ચ વિષ્ણુમાતૃસ્વરૂપિણી ।
વિષ્ણુમાયા વિશાલાક્ષી વિશાલનયનોજ્જ્વલા ॥ ૪૧॥

વિશ્વેશ્વરી ચ વિશ્વાત્મા વિશ્વેશી વિશ્વરૂપિણી ।
વિશ્વેશ્વરી શિવાધારા શિવનાથા શિવપ્રિયા ॥ ૪૨॥

શિવમાતા શિવાક્ષી ચ શિવદા શિવરૂપિણી ।
ભવેશ્વરી ભવારાધ્યા ભવેશી ભવનાયિકા ॥ ૪૩॥

ભવમાતા ભવાગમ્યા ભવકણ્ટકનાશિની ।
ભવપ્રિયા ભવાનન્દા ભવાની ભવમોચિની ॥ ૪૪॥

ગીતિર્વરેણ્યા સાવિત્રી બ્રહ્માણી બ્રહ્મરૂપિણી ।
બ્રહ્મેશી બ્રહ્મદા બ્રાહ્મી બ્રહ્માણી બ્રહ્મવાદિની ॥ ૪૫॥

દુર્ગસ્થા દુર્ગરૂપા ચ દુર્ગા દુર્ગાર્તિનાશિની ।
ત્રયીદા બ્રહ્મદા બ્રાહ્મી બ્રહ્માણી બ્રહ્મવાદિની ॥ ૪૬॥

ત્વક્સ્થા તથા ચ ત્વગ્રૂપા ત્વગ્ગા ત્વગાર્તિહારિણી ।
સ્વગમા નિર્ગમા દાત્રી દાયા દોગ્ધ્રી દુરાપહા ॥ ૪૭॥

દૂરઘ્ની ચ દુરારાધ્યા દૂરદુષ્કૃતનાશિની ।
પઞ્ચસ્થા પઞ્ચમી પૂર્ણા પૂર્ણાપીઠ નિવાસિની ॥ ૪૮॥

સત્ત્વસ્થા સત્ત્વરૂપા ચ સત્ત્વદા સત્ત્વસમ્ભવા ।
રજઃસ્થા ચ રજોતૂપા રજોગુણસમુદ્ભવા ॥ ૪૯॥

તામસી ચ તમોરૂપા તામસી તમસઃ પ્રિયા ।
તમોગુણસમુદ્ભૂતા સાત્ત્વિકી રાજસી તમી ॥ ૫૦॥

કલા કાષ્ઠા નિમેષા ચ સ્વકૃતા તદનન્તરા ।
અર્ધમાસા ચ માસા ચ સંવત્સરસ્વરૂપિણી ॥ ૫૧॥

યુગસ્થા યુગરૂપા ચ કલ્પસ્થા કલ્પરૂપિણી ।
નાનારત્નવિચિત્રાઙ્ગી નાનાભરણમણ્ડિતા ॥ ૫૨॥

વિશ્વાત્મિકા વિશ્વમાતા વિશ્વપાશા વિધાયિની ।
વિશ્વાસકારિણી વિશ્વા વિશ્વશક્તિર્વિચક્ષણા ॥ ૫૩॥

જપાકુસુમસઙ્કાશા દાડિમીકુસુમોપમા ।
ચતુરઙ્ગા ચતુર્બાહુશ્ચતુરા ચારુહાસિની ॥ ૫૪॥

સર્વેશી સર્વદા સર્વા સર્વજ્ઞા સર્વદાયિની ।
સર્વેશ્વરી સર્વવિદ્યા શર્વાણી સર્વમઙ્ગલા ॥ ૫૫॥

નલિની નન્દિની નન્દા આનન્દાનન્દવર્ધિની ।
વ્યાપિની સર્વભૂતેષુ ભવભારવિનાશિની ॥ ૫૬॥

કુલીના કુલમધ્યસ્થા કુલધર્મોપદેશિની ।
સર્વશ‍ૃઙ્ગારવેશાઢ્યા પાશાઙ્કુશકરોદ્યતા ॥ ૫૭॥

સૂર્યકોટિસહસ્રાભા ચન્દ્રકોટિનિભાનના ।
ગણેશકોટિલાવણ્યા વિષ્ણુકોટ્યરિમર્દિની ॥ ૫૮॥

દાવાગ્નિકોટિજ્વલિની રુદ્રકોટ્યુગ્રરૂપિણી
સમુદ્રકોટિગમ્ભીરા વાયુકોટિમહાબલા ॥ ૫૯॥

આકાશકોટિવિસ્તારા યમકોટિભયઙ્કરા ।
મેરુકોટિસમુચ્છ્રાયા ગુણકોટિસમૃદ્ધિદા ॥ ૬૦॥

નિષ્કલઙ્કા નિરાધારા નિર્ગુણા ગુણવર્જિતા ।
અશોકા શોકરહિતા તાપત્રયવિવર્જિતા ॥ ૬૧॥

વિશિષ્ટા વિશ્વજનની વિશ્વમોહવિધારિણી ।
ચિત્રા વિચિત્રા ચિત્રાશી હેતુગર્ભા કુલેશ્વરી ॥ ૬૨॥

ઇચ્છાશક્તિઃ જ્ઞાનશક્તિઃ ક્રિયાશક્તિઃ શુચિસ્મિતા ।

શ્રુતિસ્મૃતિમયી સત્યા શ્રુતિરૂપા શ્રુતિપ્રિયા ॥ ૬૩॥

શ્રુતિપ્રજ્ઞા મહાસત્યા પઞ્ચતત્ત્વોપરિસ્થિતા ।
પાર્વતી હિમવત્પુત્રી પાશસ્થા પાશરૂપિણી ॥ ૬૪॥

જયન્તી ભદ્રકાલી ચ અહલ્યા કુલનાયિકા ।
ભૂતધાત્રી ચ ભૂતેશી ભૂતસ્થા ભૂતભાવિની ॥ ૬૫॥

મહાકુણ્ડલિનીશક્તિર્મહાવિભવવર્ધિની ।
હંસાક્ષી હંસરૂપા ચ હંસસ્થા હંસરૂપિણી ॥ ૬૬॥

સોમસૂર્યાગ્નિમધ્યસ્થા મણિપૂરકવાસિની ।
ષટ્ પત્રામ્ભોજમધ્યસ્થા મણિપૂરનિવાસિની ॥ ૬૭॥

દ્વાદશારસરોજસ્થા સૂર્યમણ્ડલવાસિની ।
અકલઙ્કા શશાઙ્કાભા ષોડશારનિવાસિની ॥ ૬૮॥

દ્વિપત્રદલમધ્યસ્થા લલાટતલવાસિની ।
ડાકિની શાકિની ચૈવ લાકિની કાકિની તથા ॥ ૬૯॥

રાકિણી હાકિની ચૈવ ષટ્ચક્રક્રમવાસિની ।
સૃષ્ટિસ્થિતિવિનાશા ચ સૃષ્ટિસ્થિત્યન્તકારિણી ॥ ૭૦॥

શ્રીકણ્ઠા શ્રીપ્રિયા કણ્ઠનાદાખ્યા બિન્દુમાલિની ।
ચતુઃષષ્ટિકલાધારા મેરુદણ્ડસમાશ્રયા ॥ ૭૧॥

મહાકાલી દ્યુતિર્મેધા સ્વધા તુષ્ટિર્મહાદ્યુતિઃ ।
હિઙ્ગુલા મઙ્ગલશિવા સુષુમ્ણામધ્યગામિની ॥ ૭૨॥

પરા ઘોરા કરાલાક્ષી વિજયા જયશાલિની ।
હૃત્પદ્મનિલયા દેવી ભીમા ભૈરવનાદિની ॥ ૭૩॥

આકાશલિઙ્ગભૂતા ચ ભુવનોદ્યાનવાસિની ।
મહાસૂક્ષ્માઽભયા કાલી ભીમરૂપા મહાબલા ॥ ૭૪॥

મેનકાગર્ભસમ્ભૂતા તપ્તકાઞ્ચનસન્નિભા ।
અન્તઃસ્થા કૂટબીજા ચ ત્રિકૂટાચલવાસિની ॥ ૭૫॥

વર્ણાક્ષા વર્ણરહિતા પઞ્ચાશદ્વર્ણભેદિની ।
વિદ્યાધરી લોકધાત્રી અપ્સરા અપ્સરઃપ્રિયા ॥ ૭૬॥

દક્ષા દાક્ષાયણી દીક્ષા દક્ષયજ્ઞવિનાશિની ।
યશસ્વિની યશઃપૂર્ણા યશોદાગર્ભસમ્ભવા ॥ ૭૭॥

દેવકી દેવમાતા ચ રાધિકા કૃષ્ણવલ્લભા ।
અરુન્ધતી શચીન્દ્રાણી ગાન્ધારી ગન્ધમોદિની ॥ ૭૮॥

ધ્યાનાતીતા ધ્યાનગમ્યા ધ્યાના ધ્યાનાવધારિણી ।
લમ્બોદરી ચ લમ્બોષ્ઠા જામ્બવતી જલોદરી ॥ ૭૯॥

મહોદરી મુક્તકેશી મુક્તિકામાર્થસિદ્ધિદા ।
તપસ્વિની તપોનિષ્ઠા ચાપર્ણા પર્ણભક્ષિણી ॥ ૮૦॥

બાણચાપધરા વીરા પાઞ્ચાલી પઞ્ચમપ્રિયા ।
ગુહ્યા ગભીરા ગહના ગુહ્યતત્ત્વા નિરઞ્જના ॥ ૮૧॥

અશરીરા શરીરસ્થા સંસારાર્ણવતારિણી ।
અમૃતા નિષ્કલા ભદ્રા સકલા કૃષ્ણપિઙ્ગલા ॥ ૮૨॥

ચક્રેશ્વરી ચક્રહસ્તા પાશચક્રનિવાસિની ।
પદ્મરાગપ્રતીકાશા નિર્મલાકાશસન્નિભા ॥ ૮૩॥

ઊર્ધ્વસ્થા ઊર્ધ્વરૂપા ચ ઊર્ધ્વપદ્મનિવાસિની ।
કાર્યકારણકર્ત્રી ચ પર્વાખ્યા રૂપસંસ્થિતા ॥ ૮૪॥

રસજ્ઞા રસમધ્યસ્થા ગન્ધજ્ઞા ગન્ધરૂપિણી ।
પરબ્રહ્મસ્વરૂપા ચ પરબ્રહ્મનિવાસિની ॥ ૮૫॥

શબ્દબ્રહ્મસ્વરૂપા ચ શબ્દસ્થા શબ્દવર્જિતા ।
સિદ્ધિર્વૃદ્ધિપરા વૃદ્ધિઃ સકીર્તિર્દીપ્તિસંસ્થિતા ॥ ૮૬॥

સ્વગુહ્યા શામ્ભવીશક્તિસ્તત્ત્વજ્ઞા તત્ત્વરૂપિણી ।
સરસ્વતી ભૂતમાતા મહાભૂતાધિપપ્રિયા ॥ ૮૭॥

શ્રુતિપ્રજ્ઞાદિમા સિદ્ધિઃ દક્ષકન્યાઽપરાજિતા ।
કામસન્દીપની કામા સદાકામા કુતૂહલા ॥ ૮૮॥

ભોગોપચારકુશલા અમલા હ્યમલાનના ।
ભક્તાનુકમ્પિની મૈત્રી શરણાગતવત્સલા ॥ ૮૯॥

સહસ્રભુજા ચિચ્છક્તિઃ સહસ્રાક્ષા શતાનન ।
સિદ્ધલક્ષ્મીર્મહાલક્ષ્મીર્વેદલક્ષ્મીઃ સુલક્ષણા ॥ ૯૦॥

યજ્ઞસારા તપસ્સારા ધર્મસારા જનેશ્વરી ।
વિશ્વોદરી વિશ્વસૃષ્ટા વિશ્વાખ્યા વિશ્વતોમુખી ॥ ૯૧॥

વિશ્વાસ્યશ્રવણઘ્રાણા વિશ્વમાલા પરાત્મિકા ।
તરુણાદિત્યસઙ્કાશા કરણાનેકસઙ્કુલા ॥ ૯૨॥

ક્ષોભિણી મોહિની ચૈવ સ્તમ્ભિની જૃમ્ભિની તથા ।
રથિની ધ્વજિની સેના સર્વમન્ત્રમયી ત્રયી ॥ ૯૩॥

જ્ઞાનમુદ્રા મહામુદ્રા જપમુદ્રા મહોત્સવા ।
જટાજૂટ ધરા મુક્તા સૂક્ષ્મશાન્તિર્વિભીષણા ॥ ૯૪॥

દ્વીપિચર્મપરીધાના ચીરવલ્કલધારિણી ।
ત્રિશૂલડમરુધરા નરમાલાવિભૂષિણી ॥ ૯૫॥

અત્યુગ્રરૂપિણી ચોગ્રા કલ્પાન્તદહનોપમા ।
ત્રૈલોક્યસાધિની સાધ્યા સિદ્ધસાધકવત્સલા ॥ ૯૬॥

સર્વવિદ્યામયી સારા અસુરામ્બુધિધારિણી ।
સુભગા સુમુખી સૌમ્યા સુશૂરા સોમભૂષણા ॥ ૯૭॥

શુદ્ધસ્ફટિકસઙ્કુશા મહાવૃષભવાહિની ।
મહિષી મહિષારૂઢા મહિષાસુરઘાતિની ॥ ૯૮॥

દમિની દામિની દાન્તા દયા દોગ્ધ્રી દુરાપહા ।
અગ્નિજિહ્વા મહાઘોરાઽઘોરા ઘોરતરાનના ॥ ૯૯॥

નારાયણી નારસિંહી નૃસિંહહૃદયસ્થિતા ।
યોગેશ્વરી યોગરૂપા યોગમાલા ચ યોગિની ॥ ૧૦૦॥

ખેચરી ભૂચરી ખેલા નિર્વાણપદસંશ્રયા ।
નાગિની નાગકન્યા ચ સુવેગા નાગનાયિકા ॥ ૧૦૧॥

વિષજ્વાલાવતી દીપ્તા કલાશતવિભૂષણા ।
ભીમવક્ત્રા મહાવક્ત્રા વક્ત્રાણાં કોટિધારિણી ॥ ૧૦૨॥

મહદાત્મા ચ ધર્મજ્ઞા ધર્માતિસુખદાયિની ।
કૃષ્ણમૂર્તિર્મહામૂર્તિર્ઘોરમૂર્તિર્વરાનના ॥ ૧૦૩॥

સર્વેન્દ્રિયમનોન્મત્તા સર્વેન્દ્રિયમનોમયી ।

સર્વસઙ્ગ્રામજયદા સર્વપ્રહરણોદ્યતા ॥ ૧૦૪॥

સર્વપીડોપશમની સર્વારિષ્ટવિનાશિની ।
સર્વૈશ્વર્યસમુત્પત્તિઃ સર્વગ્રહવિનાશિની ॥ ૧૦૫॥

ભીતિઘ્ની ભક્તિગમ્યા ચ ભક્તાનામાર્તિનાશિની ।
માતઙ્ગી મત્તમાતઙ્ગી માતઙ્ગગણમણ્ડિતા ॥ ૧૦૬॥

અમૃતોદધિમધ્યસ્થા કટિસૂત્રૈરલઙ્કૃતા ।
અમૃતદ્વીપમધ્યસ્થા પ્રબલા વત્સલોજ્જ્વલા ॥ ૧૦૭॥

મણિમણ્ડપમધ્યસ્થા રત્નસિંહાસનસ્થિતા ।
પરમાનન્દમુદિતા ઈષત્પ્રહસિતાનના ॥ ૧૦૮॥

કુમુદા લલિતા લોલા લાક્ષા લોહિતલોચના ।
દિગ્વાસા દેવદૂતી ચ દેવદેવાદિદેવતા ॥ ૧૦૯॥

સિંહોપરિસમારૂઢા હિમાચલનિવાસિની ।
અટ્ટાટ્ટહાસિની ઘોરા ઘોરદૈત્યવિનાશિની ॥ ૧૧૦॥

અત્યુગ્રા રક્તવસના નાગકેયૂરમણ્ડિતા ।
મુક્તાહારસ્તનોપેતા તુઙ્ગપીનપયોધરા ॥ ૧૧૧॥

રક્તોત્પલદલાકારા મદાઘૂર્ણિતલોચના ।
ગણ્ડમણ્ડિતતાટઙ્કા ગુઞ્જાહારવિભૂષણા ॥ ૧૧૨॥

સઙ્ગીતરઙ્ગરસના વીણાવાદ્યકુતૂહલા ।
સમસ્તદેવમૂર્તિશ્ચ હ્યસુરક્ષયકારિણી ॥ ૧૧૩॥

ખડ્ગિની શૂલહસ્તા ચ ચક્રિણી ચાક્ષમાલિની ।
પાશિની ચક્રિણી દાન્તા વજ્રિણી વજ્રદણ્ડિની ॥ ૧૧૪॥

આનન્દોદધિમધ્યસ્થા કટિસૂત્રૈરલઙ્કૃતા ।
નાનાભરણદીપ્તાઙ્ગી નાનામણિવિભૂષણા ॥ ૧૧૫॥

જગદાનન્દસમ્ભૂતિશ્ચિન્તામણિગુણાકરા ।
ત્રૈલોક્યનમિતા પૂજ્યા ચિન્મયાઽઽનન્દરૂપિણી ॥ ૧૧૬॥

ત્રૈલોક્યનન્દિની દેવી દુઃખદુઃસ્વપ્નનાશિની ।
ઘોરાગ્નિદાહશમની રાજદૈવાદિશાલિની ॥ ૧૧૭॥

મહાઽપરાધરાશિઘ્ની મહાવૈરિભયાપહા ।
રાગાદિદોષરહિતા જરામરણવર્જિતા ॥ ૧૧૮॥

ચન્દ્રમણ્ડલમધ્યસ્થા પીયૂષાર્ણવસમ્ભવા ।
સર્વદેવૈઃ સ્તુતા દેવી સર્વસિદ્ધિનમસ્કૃતા ॥ ૧૧૯॥

અચિન્ત્યશક્તિરૂપા ચ મણિમન્ત્રમહૌષધી ।
સ્વસ્તિઃ સ્વસ્તિમતી બાલા મલયાચલસંસ્થિતા ॥ ૧૨૦॥

ધાત્રી વિધાત્રી સંહારા રતિજ્ઞા રતિદાયિની ।
રુદ્રાણી રુદ્રરૂપા ચ રૌદ્રી રૌદ્રાર્તિહારિણી ॥ ૧૨૧॥

સર્વજ્ઞા ચૌરધર્મજ્ઞા રસજ્ઞા દીનવત્સલા ।
અનાહતા ત્રિનયના નિર્ભરા નિર્વૃતિઃ પરા ॥ ૧૨૨॥

પરા ઘોરકરાલાક્ષી સ્વમાતા પ્રિયદાયિની ।
મન્ત્રાત્મિકા મન્ત્રગમ્યા મન્ત્રમાતા સમન્ત્રિણી ॥ ૧૨૩॥

શુદ્ધાનન્દા મહાભદ્રા નિર્દ્વન્દ્વા નિર્ગુણાત્મિકા ।
ધરણી ધારિણી પૃથ્વી ધરા ધાત્રી વસુન્ધરા ॥ ૧૨૪॥

મેરુમન્દિરમધ્યસ્થા શિવા શઙ્કરવલ્લભા ।
શ્રીગતિઃ શ્રીમતી શ્રેષ્ઠા શ્રીકરી શ્રીવિભાવની ॥ ૧૨૫॥

શ્રીદા શ્રીમા શ્રીનિવાસા શ્રીમતી શ્રીમતાં ગતિઃ ।
ઉમા શારઙ્ગિણી કૃષ્ણા કુટિલા કુટિલાલકા ॥ ૧૨૬॥

ત્રિલોચના ત્રિલોકાત્મા પુણ્યદા પુણ્યકીર્તિદા ।
અમૃતા સત્યસઙ્કલ્પા સત્યાશા ગ્રન્થિભેદિની ॥ ૧૨૭॥

પરેશા પરમા વિદ્યા પરાવિદ્યા પરાત્પરા ।
સુન્દરાઙ્ગી સુવર્ણાભા સુરાસુરનમસ્કૃતા ॥ ૧૨૮॥

પ્રજા પ્રજાવતી ધન્યા ધનધાન્યસમૃદ્ધિદા ।
ઈશાની ભુવનેશાની ભુવના ભુવનેશ્વરી ॥ ૧૨૯॥

અનન્તાનન્તમહિમા જગત્સારા જગદ્ભવા ।
અચિન્ત્યશક્તિમહિમા ચિન્ત્યાચિન્ત્યસ્વરૂપિણી ॥ ૧૩૦॥

જ્ઞાનગમ્યા જ્ઞાનમૂર્તિર્જ્ઞાનદા જ્ઞાનશાલિની ।
અમિતા ઘોરરૂપા ચ સુધાધારા સુધાવહા ॥ ૧૩૧॥

ભાસ્કરી ભાસુરી ભાતી ભાસ્વદુત્તાનશાયિની ।
અનસૂયા ક્ષમા લજ્જા દુર્લભા ભુવનાન્તિકા ॥ ૧૩૨॥

વિશ્વવન્દ્યા વિશ્વબીજા વિશ્વધીર્વિશ્વસંસ્થિતા ।
શીલસ્થા શીલરૂપા ચ શીલા શીલપ્રદાયિની ॥ ૧૩૩॥

બોધિની બોધકુશલા રોધિની બાધિની તથા ।
વિદ્યોતિની વિચિત્રાત્મા વિદ્યુત્પટલસન્નિભા ॥ ૧૩૪॥

વિશ્વયોનિર્મહાયોનિઃ કર્મયોનિઃ પ્રિયંવદા ।
રોગિણી રોગશમની મહારોગભયાવહા ॥ ૧૩૫॥

વરદા પુષ્ટિદા દેવી માનદા માનવપ્રિયા ।
કૃષ્ણાઙ્ગવાહિની ચૈવ કૃષ્ણા કૃષ્ણસહોદરી ॥ ૧૩૬॥

શામ્ભવી શમ્ભુરૂપા ચ તથૈવ શમ્ભુસમ્ભવા ।
વિશ્વોદરી વિશ્વમાતા યોગમુદ્રા ચ યોગિની ॥ ૧૩૭॥

વાગીશ્વરી યોગમુદ્રા યોગિનીકોટિસેવિતા ।
કૌલિકાનન્દકન્યા ચ શૃઙ્ગારપીઠવાસિની ॥ ૧૩૮॥

ક્ષેમઙ્કરી સર્વરૂપા દિવ્યરૂપા દિગમ્બરા ।
ધૂમ્રવક્ત્રા ધૂમ્રનેત્રા ધૂમ્રકેશી ચ ધૂસરા ॥ ૧૩૯॥

પિનાકી રુદ્રવેતાલી મહાવેતાલરૂપિણી ।
તપની તાપિની દક્ષા વિષ્ણુવિદ્યા ત્વનાથિતા ॥ ૧૪૦॥

અઙ્કુરા જઠરા તીવ્રા અગ્નિજિહ્વા ભયાપહા ।
પશુઘ્ની પશુરૂપા ચ પશુદા પશુવાહિની ॥ ૧૪૧॥

પિતા માતા ચ ભ્રાતા ચ પશુપાશવિનાશિની ।
ચન્દ્રમા ચન્દ્રરેખા ચ ચન્દ્રકાન્તિવિભૂષણા ॥ ૧૪૨॥

કુઙ્કુમાઙ્કિતસર્વાઙ્ગી સુધીર્બુદ્બુદલોચના ।
શુક્લામ્બરધરા દેવી વીણાપુસ્તકધારિણી ॥ ૧૪૩॥

શ્વેતવસ્ત્રધરા દેવી શ્વેતપદ્માસનસ્થિતા ।
રક્તામ્બરા ચ રક્તાઙ્ગી રક્તપદ્મવિલોચના ॥ ૧૪૪॥

નિષ્ઠુરા ક્રૂરહૃદયા અક્રૂરા મિતભાષિણી ।

આકાશલિઙ્ગસમ્ભૂતા ભુવનોદ્યાનવાસિની ॥ ૧૪૫॥

મહાસૂક્ષ્મા ચ કઙ્કાલી ભીમરૂપા મહાબલા ।
અનૌપમ્યગુણોપેતા સદા મધુરભાષિણી ॥ ૧૪૬॥

વિરૂપાક્ષી સહસ્રાક્ષી શતાક્ષી બહુલોચના ।
દુસ્તરી તારિણી તારા તરુણી તારરૂપિણી ॥ ૧૪૭॥

સુધાધારા ચ ધર્મજ્ઞા ધર્મયોગોપદેશિની ।
ભગેશ્વરી ભગારાધ્યા ભગિની ભગિનીપ્રિયા ॥ ૧૪૮॥

ભગવિશ્વા ભગક્લિન્ના ભગયોનિર્ભગપ્રદા ।
ભગેશ્વરી ભગરૂપા ભગગુહ્યા ભગાવહા ॥ ૧૪૯॥

ભગોદરી ભગાનન્દા ભગાઢ્યા ભગમાલિની ।
સર્વસઙ્ક્ષોભિણીશક્તિઃ સર્વવિદ્રાવિણી તથા ॥ ૧૫૦॥

માલિની માધવી માધ્વી મદરૂપા મદોત્કટા ।
ભેરુણ્ડા ચણ્ડિકા જ્યોત્સ્ના વિશ્વચક્ષુસ્તપોવહા ॥ ૧૫૧॥

સુપ્રસન્ના મહાદૂતી યમદૂતી ભયઙ્કરી ।
ઉન્માદિની મહારૂપા દિવ્યરૂપા સુરાર્ચિતા ॥ ૧૫૨॥

ચૈતન્યરૂપિણી નિત્યા નિત્યક્લિન્ના મદોલ્લસા ।
મદિરાનન્દકૈવલ્યા મદિરાક્ષી મદાલસા ॥ ૧૫૩॥

સિદ્ધેશ્વરી સિદ્ધવિદ્યા સિદ્ધાદ્યા સિદ્ધવન્દિતા ।
સિદ્ધાર્ચિતા સિદ્ધમાતા સિદ્ધસર્વાર્થસાધિકા ॥ ૧૫૪॥

મનોન્મની ગુણાતીતા પરઞ્જ્યોતિઃસ્વરૂપિણી ।
પરેશી પારગા પારા પારસિદ્ધિઃ પરા ગતિઃ ॥ ૧૫૫॥

વિમલા મોહિનીરૂપા મધુપાનપરાયણા ।
વેદવેદાઙ્ગજનની સર્વશાસ્ત્રવિશારદા ॥ ૧૫૬॥

સર્વવેદમયી વિદ્યા સર્વશાસ્ત્રમયી તથા ।
સર્વજ્ઞાનમયી દેવી સર્વધર્મમયીશ્વરી ॥ ૧૫૭॥

સર્વયજ્ઞમયી યજ્વા સર્વમન્ત્રાધિકારિણી ।
ત્રૈલોક્યાકર્ષિણી દેવી સર્વાદ્યાનન્દરૂપિણી ॥ ૧૫૮॥

સર્વસમ્પત્ત્યધિષ્ઠાત્રી સર્વવિદ્રાવિણી પરા ।
સર્વસઙ્ક્ષોભિણી દેવી સર્વમઙ્ગલકારિણી ॥ ૧૫૯॥

ત્રૈલોક્યરઞ્જની દેવી સર્વસ્તમ્ભનકારિણી ।
ત્રૈલોક્યજયિની દેવી સર્વોન્માદસ્વરૂપિણી ॥ ૧૬૦॥

સર્વસમ્મોહિની દેવી સર્વવશ્યઙ્કરી તથા ।
સર્વાર્થસાધિની દેવી સર્વસમ્પત્તિદાયિની ॥ ૧૬૧॥

સર્વકામપ્રદા દેવી સર્વમઙ્ગલકારિણી ।
સર્વસિદ્ધિપ્રદા દેવી સર્વદુઃખવિમોચિની ॥ ૧૬૨॥

સર્વમૃત્યુપ્રશમની સર્વવિઘ્નવિનાશિની ।
સર્વાઙ્ગસુન્દરી માતા સર્વસૌભાગ્યદાયિની ॥ ૧૬૩॥

સર્વદા સર્વશક્તિશ્ચ સર્વૈશ્વર્યફલપ્રદા ।
સર્વજ્ઞાનમયી દેવી સર્વવ્યાધિવિનાશિની ॥ ૧૬૪॥

સર્વાધારા સર્વરૂપા સર્વપાપહરા તથા ।
સર્વાનન્દમયી દેવી સર્વરક્ષાસ્વરૂપિણી ॥ ૧૬૫॥

સર્વલક્ષ્મીમયી વિદ્યા સર્વેપ્સિતફલપ્રદા ।
સર્વદુઃખપ્રશમની પરમાનન્દદાયિની ॥ ૧૬૬॥

ત્રિકોણનિલયા ત્રીષ્ટા ત્રિમતા ત્રિતનુસ્થિતા ।
ત્રૈવિદ્યા ચૈવ ત્રિસ્મારા ત્રૈલોક્યત્રિપુરેશ્વરી ॥ ૧૬૭॥

ત્રિકોદરસ્થા ત્રિવિધા ત્રિપુરા ત્રિપુરાત્મિકા ।
ત્રિધાત્રી ત્રિદશા ત્ર્યક્ષા ત્રિઘ્ની ત્રિપુરવાહિની ॥ ૧૬૮॥

ત્રિપુરાશ્રીઃ સ્વજનની બાલાત્રિપુરસુન્દરી ।
શ્રીમત્ત્રિપુરસુન્દર્યા મન્ત્રનામસહસ્રકમ્ ॥ ૧૬૯॥

ગુહ્યાદ્ગુહ્યતરં પુત્ર ! તવ પ્રીત્યા પ્રકીર્તિતમ્ ।
ગોપનીયં પ્રયત્નેને પઠનીયં પ્રયત્નતઃ ॥ ૧૭૦॥

નાતઃ પરતરં પુણ્યં નાતઃ પરતરં શુભમ્ ।
નાતઃ પરતરં સ્તોત્રં નાતઃ પરતરા ગતિઃ ॥ ૧૭૧॥

સ્તોત્રં સહસ્રનામાખ્યં મમ વક્ત્રાદ્વિનિસ્સૃતમ્ ।
યઃ પઠેત્પરયા ભક્ત્યા શ ૃણુયાદ્વા સમાહિતઃ ॥ ૧૭૨॥

મોક્ષાર્થી લભતે મોક્ષં સુખાર્થી સુખમાપ્નુયાત્ ।
ફલાર્થી લભતે કામાન્ ધનાર્થી લભતે ધનમ્ ॥ ૧૭૩॥

વિદ્યાર્થી લભતે વિદ્યાં યશોઽર્થી લભતે યશઃ ।
કન્યાર્થી લભતે કન્યાં સુતાર્થી લભતે સુતમ્ ॥ ૧૭૪॥

ગુર્વિણી લભતે પુત્રં કન્યા વિન્દતિ સત્પતિમ્ ।
મૂર્ખેઽપિ લભતે શાસ્ત્રં ચૌરોઽપિ લભતે ગતિમ્ ॥ ૧૭૫॥

સંક્રાન્તાવમાવાસ્યાયામષ્ટમ્યાં ભૌમવાસરે ।
પઠેદ્વા પાઠયેદ્વાપિ શ‍ૃણુયાદ્વા સમાહિતઃ ॥ ૧૭૬॥

પૌર્ણમાસ્યાં ચતુર્દશ્યાં નવમ્યાં ચ વિશેષતઃ ।
સ મુક્તઃ સર્વપાપેભ્યઃ કામેશ્વરસમો ભવેત્ ॥ ૧૭૭॥

લક્ષ્મીવાન્ સુતવાંશ્ચૈવ વલ્લભઃ સર્વયોષિતામ્ ।
તસ્યા વશ્યં ભવેદ્દાસ્યે ત્રૈલોક્યં સચરાચરમ્ ॥ ૧૭૮॥

રુદ્રં દૃષ્ટ્વા યથા દેવા વિષ્ણું દૃષ્ટ્વા ચ દાનવાઃ ।
પન્નગા ગરુડં દૃષ્ટ્વા સિંહં દૃષ્ટ્વા યથા મૃગાઃ ॥ ૧૭૯॥

મણ્ડૂકા ભોગિનં દૃષ્ટ્વા માર્જારં મૂષકો યથા ।
કીટવત્પ્રપલાયન્તે તસ્ય વક્ત્રાવલોકનાત્ ॥ ૧૮૦॥

અગ્નિચૌરભયં તસ્ય કદાચિન્નૈવ સમ્ભવેત્ ।
પાતકા વિવિધાઃ સન્તિ મેરુમન્દરસન્નિભાઃ ॥ ૧૮૧॥

ભસ્મસાત્તત્ક્ષણં કુર્યાત્ તૃણં વહ્નિયુતં યથા ।
એકધા પઠનાદેવ સર્પપાપક્ષયો ભવેત્ ॥ ૧૮૨॥

દશધા પઠનાદેવ વાઞ્છાસિદ્ધિઃ પ્રજાયતે ।
નશ્યન્તિ સહસા રોગા દશધાઽઽવર્તનેન ચ ॥ ૧૮૩॥

સહસ્રં વા પઠેદ્યસ્તુ ખેચરો જાયતે નરઃ ।
સહસ્રદશકં યસ્તુ પઠેદ્ભક્તિપરાયણઃ ॥ ૧૮૪॥

સા તસ્ય જગતાં ધાત્રી પ્રત્યક્ષા ભવતિ ધ્રુવમ્ ।
લક્ષં પૂર્ણં યદા પુત્ર ! સ્તવરાજં પઠેત્સુધીઃ ॥ ૧૮૫॥

ભવપાશવિનિર્મુક્તો મમ તુલ્યો ન સંશયઃ ।

સર્વતીર્થેષુ યત્પુણ્યં સર્વયજ્ઞેષુ યત્ફલમ્ ॥ ૧૮૬॥

સર્વવેદેષુ યત્પુણ્યં તત્ફલં પરિકિર્તિતમ્ ।
તત્ફલં કોટિગુણિતં સકૃજ્જપ્ત્વા લભેન્નરઃ ॥ ૧૮૭॥

શ્રુત્વા મહાબલશ્ચાશુ પુત્રવાન્ સર્વસમ્પદઃ ।
દેહાન્તે પરમં સ્થાનં યત્સુરૈરપિ દુર્લભમ્ ॥ ૧૮૮॥

અદ્વૈતયોગિભિર્જ્ઞેયં માર્ગગૈરપિ દુર્લભમ્ ।
સ યાસ્યતિ ન સન્દેહઃ સ્તવરાજપ્રકીર્તનાત્ ॥ ૧૮૯॥

યઃ સદા પઠતે ભક્તો મુક્તિસ્તસ્ય ન સંશયઃ ॥ ૧૯૦॥

ઇતિ શ્રીવામકેશ્વરતન્ત્રાન્તર્ગતં શ્રીબાલાસહસ્રનામસ્તોત્રં સમ્પૂર્ણમ્ ।

There are some commonalities of names with the ShoDashIsahasranAmastotram.

Proofread by PSA Easwaran

---

*Shri Bala Sahasranamastotram 2*

pdf was typeset on April 13, 2024

Please send corrections to *sanskrit@cheerful.com*